# Gō Sūktam

[RV S 6–28 (Kāñchī Pāṭhaḥa)]

ॐ आ गावो॑ , अग्मन्नुत भद्रमं॑क्रन्सीदन्॑तु गोष्ठे रणयन्॑त्वस्मे ।
ॐ ā gāvōō , ag'man'nuta bhad'ramak'ran'sīdan'n'tu
gōṣh'ṭhē raṇayan'n'tvas'mē ।
प्रजाव॑तीः पुरुरूपा॑ इह स्युरिन्द्रा॑य पूर्वीरुषसो दुहा॑नाः ॥ १ ॥
prajāva-tī[fp]' pururūpāā , ihas'
syurin'drāāya pūr'vīruṣhasō duhāānā-ḥa ॥ 1 ॥

इन्द्रो यज्व॑ने पृणते च॑ शिक्षत्युपेद्द॑दाति न स्वम् मु॑षायति ।
in'drō yaj'va-nē pṛṇatē cha-
śhik'ṣhat'yupēd'da-dāti nas' svam' mu-ṣhāyati ।
भूयो॑भूयो रयिमिद॑स्य वर्धयन्नभिन्न॑ खिल्ये नि द॑धाति देवयुम् ॥ २ ॥
bhūyōōbhūyō rayimidas'ya var'dhayan'nabhin'n'nē
khil'yē ni da-dhāti dēvayum ॥ 2 ॥

न ता न॑शन्ति न द॑भाति तस्क॑रो नासा॑मामित्रो व्यथिरा द॑धर्षति ।
na tā na-śhan'ti na da-bhāti tas'ka-rō
nāsāāmāmit'rōv' vyathirā da-dhareṣhati ।
देवाँश्च याभिर्यज॑ते ददा॑ति च ज्योगित्ताभि॑स् सचते गोप॑तिस् सह ॥ ३ ॥
dēvām̐'śhcha yābhir'yaja-tē dadāāti chaj'
jyōgit'tābhis' sachatē gōpa-tis' saha ॥ 3 ॥

www.SriVedanet

न ता , अर्वा॑ रे॒णुक॑काटो , अश्नु॒ते न सं॑स्कृ॒तत्रमुप॑ यन्ति॒ ता , अ॒भि ।
na tā , ar’vāā rēṇuka-kāṭō ,
aśh’nutē na saṁ’ṁ’skṛtat’ramupa- yan’ti tā , abhi ।
उ॒रु॒गा॒यमभ॑यन् तस्य॒ ता , अनु॒ गावो॒ मर्त॑स्य॒ वि च॑रन्ति॒ यज्व॑नः ॥४॥
urugāyamabha-yan’ tas’ya tā ,
anu gāvō mar’tas’ya vi cha-ran’ti yaj’va-naḥa ॥ 4 ॥

गावो॒ भगो॒ गाव॒ , इन्द्रो॑ मे , अच्छा॒न्गाव॒स् सोम॑स्य प्र॒थमस्य॑ भ॒क्षः ।
gāvō bhagō gāva , in’drōō mē , ach’chhān’gāvas’
sōmas’yap’ prathamas’ya- bhak’ṣhaḥa ।
इ॒मा या गाव॒स् स जना॑स॒ , इन्द्र॑ , इ॒च्छामी॒द्धृदा॒ मन॑सा चि॒दिन्द्रम्॑ ॥५॥
imā yā gāvas’ sa ja-nāsa , in’dra- ,
ich’chhāmīd’dhṛdā mana-sā chidin’dram’m ॥ 5 ॥

यू॒यङ् गा॑वो मेदयथा कृ॒शञ् चि॑दश्री॒रञ् चि॑त्कृणुथा सु॒प्रती॑कम् ।
yūyaṅ’ gāāvō mēdayathā
kṛśhañ’ chi-daśh’rīrañ’ chit’kṛṇuthā sup’ratīīkam ।
भ॒द्रङ् गृ॒हङ् कृ॑णुथ भद्रवाचो॒ बृ॒हद्वो॒ वय॑ , उच्यते स॒भासु॑ ॥६॥
bhad’raṅ’ gṛhaṅ’ kṛ-ṇutha bhad’ravāchō
bṛhad’vō vaya- , uch’yatē sabhāsu- ॥ 6 ॥

www.sai-veda.net

प्रजावतीस् सूयवसं रिशन्तीश् शुद्धा , अपस् सुप्रपाणे पिबन्तीः ।

prajāva-tīs’ sūyava-saṁ’ riśhan’tīīśh’ śhud’dhā ,
apas’ sup’rapāṇē piban’n’tī-ḥi ।

मा वस् स्तेन , ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥७॥

mā vas’ stēna , īīśhata māghaśhaṁ’ṁ’sa[fp]’
pari- vō hētī rud’ras’ya- vṛj’yā-ḥa ॥ 7 ॥

उपेदमुपपर्चनमासु गोषूप पृच्यताम् ।

upēdamu-papar’cha-namāsu gōṣhūpa- pṛch’yatām ।

उप , ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥८॥

upa- , ṛṣhabhas’ya rētas’yupēēn’dra tava- vīr’yēē ॥ 8 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net

[RV S 6-28 (Śhṛṅgērī Pāṭhaḥa)]

ॐ आ गावो॑ , अग्मन्नुत भ॒द्रम॑क्र॒न्सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे ।
ॐ ā gāvōō , ag'man'nuta bhad'ramak'ran'sīdan'n'tu
gōṣh'ṭhē raṇayan'n'tvas'mē ।
प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्यु॒रिन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः ॥ १ ॥
prajāvatī[fp]' pururūpāā , ihas'
syurin'drāāya pūr'vīruṣhasō duhāānā-ḥa ॥ 1 ॥

इन्द्रो॒ यज्व॑ने पृण॒ते च॑ शिक्ष॒त्युपेद्द॑दा॒ति न स्वम् मु॑षायति ।
in'drō yaj'vanē pṛṇatē
cha śhik'ṣhat'yupēd'dadāti nas' svam' muṣhāyati ।
भूयो॑भूयो र॒यिमिद॑स्य व॒र्धय॒न्नभि॑न्ने खि॒ल्ये नि द॑धाति दे॒वयुम् ॥ २ ॥
bhūyōōbhūyō rayimidas'ya var'dhayan'nabhin'n'nē
khil'yē ni dadhāti dēvayum ॥ 2 ॥

न ता न॑शन्ति॒ न द॑भाति॒ तस्क॑रो॒ नासा॑मामि॒त्रो व्यथि॒रा द॑धर्षति ।
na tā naśhan'ti na dabhāti tas'karō
nāsāāmāmit'rōv' vyathirā dadhareṣhati ।
दे॒वाँश्च॒ याभि॒र्यज॑ते॒ ददा॑ति च ज्योगित्ताभि॑स् सचते॒ गोप॑तिस् स॒ह ॥ ३ ॥
dēvām̐'śhcha yābhir'yajatē dadāāti chaj'
jyōgit'tābhis' sachatē gōpatis' saha ॥ 3 ॥

www.Shivedanet

न ता , अर्वा॑ रे॒णुक॑काटो , अश्नु॒ते न सं॑स्कृ॒तत्रमुप॑ यन्ति॒ ता , अ॒भि ।
na tā , ar’vāā rēṇukakāṭō , aśh’nutē
na saṁ’ṁ’skṛtat’ramupa yan’ti tā , abhi ।
उ॒रु॒गा॒यमभ॑यन् तस्य॒ ता , अनु॒ गावो॒ मर्त॑स्य॒ वि च॑रन्ति॒ यज्व॑नः ॥४॥
urugāyamabhayan’ tas’ya tā ,
anu gāvō mar’tas’ya vi charan’ti yaj’vanaḥa ॥ 4 ॥

गावो॒ भगो॒ गाव॒ , इन्द्रो॑ मे , अच्छा॒न्गाव॒स् सोम॑स्य प्र॒थमस्य॑ भ॒क्षः ।
gāvō bhagō gāva , in’drōō mē , ach’chhān’gāvas’
sōmas’yap’ prathamas’ya bhak’ṣhaḥa ।
इ॒मा या गाव॒स् स जना॑स॒ , इन्द्र॑ , इ॒च्छामी॒द्धृदा मन॑सा चि॒दिन्द्र॑म् ॥५॥
imā yā gāvas’ sa janāsa , in’dra , ich’chhāmīd’dhṛdā
manasā chidin’dram’m ॥ 5 ॥

यू॒यङ् गा॑वो मेदयथा कृ॒शञ् चि॑दश्री॒रञ् चि॑त्कृणुथा सु॒प्रती॑कम् ।
yūyaṅ’ gāāvō mēdayathā kṛśhañ’
chidaśh’rīrañ’ chit’kṛṇuthā sup’ratīīkam ।
भ॒द्रङ् गृ॒हङ् कृ॑णुथ भद्रवाचो बृ॒हद्वो॒ वय॑ , उच्यते स॒भासु॑ ॥६॥
bhad’raṅ’ gṛhaṅ’ kṛṇutha bhad’ravāchō
bṛhad’vō vaya , uch’yatē sabhāsu ॥ 6 ॥

www.sai-veda.net

प्रजावतीस् सूयवसं रिशन्तीश् शुद्धा , अपस् सुप्रपाणे पिबन्तीः ।

prajāvatīs' sūyavasaṁ' riśhan'tīīśh' śhud'dhā ,
apas' sup'rapāṇē piban'n'tī-ḥi ।

मा वस् स्तेन , ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥७॥

mā vas' stēna , īīśhata māghaśhaṁ'ṁ'sa[fp]'
pari vō hētī rud'ras'ya vṛj'yā-ḥa ॥ 7 ॥

उपेदमुपपर्चनमासु गोषूप पृच्यताम् ।

upēdamupapar'chanamāsu gōṣhūpa pṛch'yatām ।

उप , ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥८॥

upa , ṛṣhabhas'ya rētas'yupēēn'dra tava vīr'yēē ॥ 8 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.SaiVeda.net